# शोधायन

(मानविकी, समाज विज्ञान, वाणिज्य की अन्तर्राष्ट्रीय सन्दर्भित शोध पत्रिका)

वर्ष : 11
अंक : 37
अप्रैल - जून 2022

GREGN. No. 10986/2012-CO/C
ISSN 2249 - 7536 Shodhayan
MPHIN 32060/2015
Refrd. & UGC apprvd.
Peer Reviewed Research Journal
Approved & Granted by ICSSR

International Overview

Vol. 37, Year - 11, April - June 2022

# Shodhayan

(An International Quarterly Multi-disciplinary UGC approved Research Journal)



# अनुक्रमणिका


| क्र. | विषय विवरण | लेखक | पृष्ठ संख्या |
|---|---|---|---|
| | **संस्कृत साहित्य -** | | |
| 12. | शब्दः, अर्थः, तयोस्सम्बन्धश्च | डॉ. किरण आर्या | 63 - |
| 13. | अलंकृति-दर्शन | डॉ. सुकदेव बाजपेयी | 68 - |
| | **कला व संगीत -** | | |
| 14. | संगीत में घराना-एक परम्परा | शिवानी भार्गव | 72 - |
| | **इतिहास एवं पुरातत्व -** | | |
| 15. | भारतीय संविधान और डॉ. भीमराव अम्बेडकर | डॉ. पवन कुमार सिंह | 76 - |
| | **अंग्रेजी साहित्य -** | | |
| 16. | Educational Philosophy of RavindranathTagore | Ashna Khan<br>Dr. A.S. Kushwah | 87 - |
| | **विधि एवं न्याय -** | | |
| 17. | A Study of LGBT Rights in India | Charu Gupta<br>Dr. Ganesh Dubey | 92 - |
| | **मनोविज्ञान -** | | |
| 18. | महाविद्यालय के छात्र छात्राओं में आशावादी-निराशावादी अभिवृत्ति मापनी के द्वारा तुलनात्मक अध्यन करना | डॉ. संदीप कुमार अद्या | 99 - |

# शब्दः, अर्थः, तयोस्सम्बन्धश्च

*डॉ. किरण आर्या

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।

अखिलेऽपि संस्कृतवाङ्मये दर्शनश्रृंखलायां संस्कृतव्याकरणदर्शनमपि तावदेकं दर्शनम्, तच्च शब्ददर्शनमिति। दर्शनस्यास्य मौलिकः सिद्धान्तः शब्दतत्त्वात्मकः, येन जगतः सर्वाः नाना प्रक्रियाः अर्थरूपे विवर्तिताः, प्रवर्तिताः, आवर्तिताश्च भवन्ति। शब्द एव प्राणिनां चेतनास्ति, असावेव लोकव्यवहारसंचालनाय अपरिहार्यं सर्वप्रधान साधनं विद्यते। शब्दत्वं नाम विचारवाहिकात्वमिति सृष्ट्यादितः विचाराणां विनिमयाय मुख्यत्वेन शब्द एव माध्यमः खलु। अयं सूक्ष्मः वागात्मा, यः स्वाभिव्यक्तये वैखरीतिध्वनिरूपे परिवर्तते।

यथा –दृश्यते येन तद्दर्शनं व्युत्पत्त्या दृष्टिः, दिव्यदृष्टिः दर्शनम्। यया दृष्ट्या विश्वस्मिन् विश्वे व्याप्यमानं अनिर्वचनीयं ब्रह्मणः दर्शनं चिकीर्षन्ति, कुर्वन्ति च साधकाः तथैव व्याकरणदर्शने वैयाकरणानां कृते शब्द एव बह्म, तद्दर्शनं तेषां साध्यम्, शब्दब्रह्मदर्शनेन परब्रह्मदर्शनं सहजं भवतीति शास्त्रोक्तिः–**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्। शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।।** अपि च भर्तृहरिः–

तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।
तस्य प्रवृतितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते।।

अर्थात् शब्दसंस्कारप्रक्रिया परमात्म [प्रा]प्तिरुपायः, अर्थात् यः साधकः स्थूल शब्द [प्र]योगमूले विद्यमानं तत्त्वमवैति, अनुभवति सः शब्द [ब्र]ह्मरूपा मृतमास्वादयति। सृष्टि प्रपंचमूले [वि]द्यमानं शब्दब्रह्म एव स्थूलत्वेन सृष्टि प्रपंचस्तथैव भवति यथा वृक्षमूले विद्यमानः बीजः स्थूलरूपे परिणतो भवति–

एकस्य सर्वबीजस्य यस्य चेयमनेकधा।
भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः।।

शब्दब्रह्म इदमद्वितीयम् अनादिनिधनमत एव शतपथब्राह्मणे **'वाग्वै ब्रह्म'** इत्युक्तम्, शब्द एव वाक्। ऐतरेये तु **'वाग्वै समुद्रः, न वाक् क्षीयते'** वाक्ये वाक् (शब्दः) समुद्र इव अनन्तपारः, न कदाचित् कथंचित् क्षीणो भवति। सर्वेषां वेदानां वागेकायनम्, वागेव मार्गः। स एव वाक् (शब्दः) यदि सम्यक् ज्ञायते , सम्यक् ज्ञात्वा सुप्रयुज्यते तर्हि स्वर्गेऽपि लोके कामनां पूरकः भवति इति महर्षिपतंजलिः–**एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति।**

**अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनमिति** वाक्यपदीयकथनानुसारं नितान्तं वक्तुं शक्यते यत् शब्दाभावेन न संसारः संसरति न प्रत्ययः (अर्थः) प्रतीयते (ज्ञायते)। संसारे न तादृशी प्रमा (ज्ञानं) या शब्देन विना सम्भवति। ज्ञानं खलु शब्दैस्तथानुविद्धं यथा सूत्रेण माणिक्यम्–

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।

अतः समस्तमपि ज्ञानं शब्दतादात्म्यलाभं प्राप्य भासितम्भवति।

**अर्थवदधातुरप्रत्ययः प्रातिपदिकमिति** महर्षिपाणिनेः सूत्रानुसारं अर्थवन्तः, सार्थकाः शब्दाः एव प्रातिपदिकाः भवन्ति। आचार्यभर्तृहरिः अर्थस्य लक्षणं प्रतीतिरिति करोति–

*सहायक प्राध्यापक (संस्कृत), डॉ. हरीसिंह गौर विश्वविद्यालय, सागर (म.प्र.), मो.: 9479983604

**यस्मिंस्तूच्चारिते शब्दे यदा योऽर्थः प्रतीयते।**
**तमाहुरर्थं तस्यैव नान्यदर्थस्य लक्षणम्।।**

अर्थात् कश्चन अपि शब्दं श्रुत्वा मानसपटले तस्यार्थमवगच्छति तस्यावगमननेन या प्रतीति र्भवति स एव सार्थकः शब्दः। यच्छ्रवणेन न कश्चनार्थो बुद्धौ तिष्ठति स निरर्थक एव अप्रयोगार्हश्च, यतोहि अपदं न प्रयुंजीत इति वैयाकरणानां मतम्, पदं च सुबन्तं तिङन्तं वा भवति, सुप्प्रत्ययाश्च प्रातिपदिकादभवन्ति, प्रातिपदिक संज्ञा अर्थवतां शब्दानामेव भवति अतो निरर्थकः शब्दः अप्रयोगार्ह एव। महर्षियास्केनापि स्वीये निरुक्तशास्त्रे निर्वचनस्याधारः अर्थ एव इत्युररीकृतः – **अर्थनित्यः परीक्षेत**, यतोहि **अर्थ वाचः पुष्पफलमाह** यः केवलं वाचं श्रृणोति न चार्थमवगच्छति तस्मै सा वाक् अफला अपुष्पा भवति नास्मै कामान् दुग्धे, उतो त्वस्मै वाक् जायेव पत्ये तन्वं विसस्रे यः वाचं पश्यन् पश्यति, श्रृण्वन् श्रृणोति। एवं च अर्थस्य महत्त्वं प्रतिपादयन् यास्कः ब्रवीति यत् यः विनैवार्थज्ञानं वेदाध्ययनं करोति सः भारवाहक पशुरिवैव–

**स्थाणुरयं भारहारः किलाभूदधीत्य**
**वेदं न विजानाति योऽर्थम्।**
**योऽर्थज्ञ इत् सकलभद्रमश्नुते**
**नाकमेति ज्ञानविधूतपाप्मा।।**

अर्थात् यथा वृक्षः पत्रपुष्पफलानामात्मीयानां धारणमात्रेणैव संबध्यते न तज्जनिते गन्धरसरूप स्पर्श भोगसुखैः संबध्यते एवमेव यः अधीत्य वेदं न तदर्थं विजानाति सोऽपि वेदाध्ययनस्य भारमात्रमेव बिभर्ति तद्विपरीतं यः अर्थज्ञः सः सकलमन वखण्डितं भद्रम् अर्थपरिज्ञानफलं प्राप्नोति अथ च शिष्टैः पूजनार्हः सन् सः ज्ञानविधूतपाम्या नाकम प्येति। महर्षिपतंजलिरप्याह– यत् गुरुमुखात् तु श्रुतम् परं श्शब्दतः अर्थतश्चाविज्ञातम् पाठमात्रेणैव नित्यमुच्चार्यते न पुनरर्थतो विचार्यते स यथा शुष्कमेधः अग्निरहितप्रदेशे न दीप्यते तथा तदधीतमपि निष्फलं भवति। परिज्ञातं तु तदेव श्रेयसा अभ्युदयेन च युनक्तीति सर्वथा तत्परिज्ञानाय यतनीयमिति–

**यदधीतमविज्ञातं निगदेनैव शब्द्यते।**
**अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्।।**

अतः यः कुशलः शब्दान् यथावद् व्यहारकाले विशेषे–क्वचिदर्थे केनचिन्निमित्तेन प्रयुङ्क्ते स वाग्योगवित् नैवेह लोके परत्रापि अनन्तं जयमाप्नोति। वस्तुतः निरर्थकः शब्दः, नैव शब्दसंज्ञाधिकारी। वेदादिष्वपि वाचः स्तवनं तस्य अर्थवत्वादेव।

संस्कृतव्याकरणदर्शनं शब्दस्य, अर्थस्य तयोश्च सम्बन्धविषये प्रधानतया चिन्तनं करोति। वैयाकरणानां मते शब्दस्याभिप्रायः– अखण्डवाक्यं अखण्डपदं वा विद्यते। येन कश्चिदभाव, अभिप्रायश्चोत्पद्येत। अखण्डवाक्यमेव अखण्ड वाक्यार्थ वाचकः अखण्डपदमेव अखण्डपदवाचक इति शास्त्रीयम्। तस्मादेव वाक्यस्फोटः पदस्फोटः कल्प्यते। वाक्यं पदं चात्र अन्वाख्येय, येषामन्वाख्यानं संस्कारः विश्लेषणं स्वरूपसिद्धि व्याकरणस्य प्रक्रियाभागे क्रियते। तत्र वाक्य रूपान्वाख्येयशब्दस्य प्रातिपादकाः भवन्ति– वाक्ये निहितानि पदानि। पदरूपान्वाख्येयशब्दस्य च प्रातिपादकाः भवन्ति–पदे निहिताः प्रकृति प्रत्ययादयः। तथैवार्थस्यापि प्रकारद्वयं विद्यते। अखण्ड वाक्यार्थः अखण्डपदार्थश्च। अयमे वाखण्डवाक्यार्थः अखण्डपदार्थश्च स्थितलक्षण उच्यते यतोह्यस्मिन्नर्थे परिवर्तनं न भवति। अस्य लक्षणं (स्वरूपः) स्थितः (स्थिरः) भवति। स्थित लक्षणमवगमनाय यः विभागः क्रियते सः अखण्ड वाक्यार्थेन अखण्डपदार्थेन अपोद्धृतत्वात् स अपोद्धारपदार्थः कथ्यते तथा च वाक्यपदीये–

**अपोद्धारपदार्थाः ये ये चार्थाः स्थितलक्षणाः।**
**अन्वाख्येयाश्च ये शब्दाः ये चापि प्रतिपादकाः।**
**कार्यकारणभावेन योग्यभावेन च स्थिताः।**
**धर्मो ये प्रत्यये चाङ्गं सम्बन्धाः साध्वसाधुषु।।**

अत्र आचार्यभर्तृहरिः शब्दार्थसम्बन्धस्य प्रकारद्वयं वक्ति (1) कार्यकारणभावसम्बन्धः (2) योग्यतासम्बन्धश्च। शब्दादर्थः व्यज्यत इत्यनया दृष्ट्या शब्दः अर्थस्य अभिव्यंजकः, निमित्तः कारणं वा विद्यत, अर्थश्च कार्यः। परं अर्थमभिव्यंजनाय शब्दः प्रयुज्यते इति दृष्ट्या अर्थः शब्दस्य प्रयोजकः, निमित्तः, कारणमस्ति, शब्दस्तस्य कार्यः। एवं चोभयोः कार्यकारणभावसम्बन्धः विद्यत एव। तथैव शब्दार्थयोः योग्यतासम्बन्धश्चापि वर्तते। शब्दे अर्थनिर्भासयोग्यतास्ति, अर्थे च शब्दद्वाराभिव्यंजनयोग्यतास्ति। अत्र सम्बन्धविषये वाक्यपदीयकारस्येदमपि वचनं ध्यातव्यं यत् साधुशब्दार्थानां सम्बन्धः अभ्युदयनिमित्तो भवति, अर्थात् ये अर्थबोधकाः साधुशब्दास्ते तु धर्मप्राप्तिहेतवः, किन्तु असाधुशब्देषु विद्यमानः सम्बन्धः अर्थस्य बोधकोऽपि सन् अदृष्टोत्पादन क्षमः तत्र न भवति। शशब्दार्थयोः बोध्यबोध कभाव सम्बन्धोऽपि वक्तुं शक्यते, तत्र शब्दो बोधकः, अर्थस्तु बोध्यः। शब्देनार्थः बुध्यत इति। महावैयोरणनागेशेनात्र शब्दार्थयोर्मध्ये तादात्म्य संबन्धः स्वीकृतः। तादात्म्यस्य लक्षणं कुर्वन् आचार्य नागेशभट्टमहोदयः कथयति–

**तादात्म्यं च तदिभन्नत्वे सति तदभेदेन**
**प्रतीयमानत्वमिति भेदाभेदसमनियतम्।**
**तद्भेदस्याध्यस्त्वाच्च न तयोर्विरोधः।**

अर्थात् तस्मात् भिन्नत्वे सन् तस्याभेदस्य प्रतीतिः स्यात्, अतः तादात्म्यभेदाभेदः समनियतः। अभेदश्च आरोप्यते अतः नास्ति उभयोर्विरोधः। तात्पर्यं यत् अर्थः शब्दात् भिन्नोऽपि भवति अभिन्नश्च। योऽर्थः यस्मात् शब्दात् भिन्नाभिन्नः भवति तेन शब्देन तस्यार्थस्य बोधो भवति, नान्यस्य। अत एव वैयाकरणानां मते शब्दार्थसंबन्धः शब्दस्य योग्यत्वमाश्रयति, यथा च वाक्यपदीये–

**इन्द्रियाणां स्वविषयेष्वसनादियोग्यता।**
**अनादिरर्थैः शब्दानां संबन्धो योग्यता तथा।।**

अर्थात् यथा चक्षुरिन्द्रियाणां स्वाभाविक योग्यता प्रत्यक्षादिकं विद्यते तथैव शब्दस्य स्वाभाविकी शक्तिः अर्थबोधरूपा विद्यते।

वस्तुतस्तु शब्दः अर्थः उभावपि भाषायाः मुख्यत्वेन स्तम्भावेव। कश्चनापि अर्थवान् शब्दः कांचिदपि अर्थविशेषप्रतीतिं कारयत्येव। कस्मिन्नपि शब्दे तस्य वाच्यार्थः संकेतितो भवति यः शब्दशास्त्रस्य भाषाशास्त्रस्य विवेचको भवति। तर्हि स्पष्टं यत् केन शब्देन कोऽर्थःप्रतीयते इति संकेतग्रहेण ज्ञायते। संकेतग्रहस्य खलु अष्टसाधनानि अभिहितानि सन्ति–

**शक्तिग्रहं व्याकरणोपमान**
**कोशाप्तवाक्यात् व्यवहारतश्च।**
**वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः**
**सिद्धपदस्य वृद्धाः।।**

तेषु व्याकरणम्, उपमानम्, शब्दकोशः, आप्तवाक्यम्, व्यवहारः, प्रकरणम्, विवृतिः, प्रसिद्धपदसान्निध्यम् एतान्यष्टसाधनानि सन्ति। तत्र व्याकरणं शब्दानामर्थज्ञाने अत्यन्तं सहायकम्। व्याकरणेनैव प्रकृतिप्रत्ययसमासलिंगादीनां बोधो जायते। एवं चान्यान्यपि निर्दिष्टानि संकेतग्रहसाधनापि सन्ति यैः शब्दानामर्थाः उपजायन्ते। यथैव प्रयोक्ता शब्दविशेषविषयं प्रयत्नमभिपद्यमानः प्रतिशब्दं परितः परिच्छिन्नान् शब्दात्मनः संस्पृशन्निव मनः प्राणिधत्ते तथैव प्रतिपत्तापि शब्दस्वरूपपरिच्छेदाधीनमर्थग्रहणं मन्यमानस्तं शब्दं सर्वैः सम्बन्धिभिः विशेषणैः

आश्रितसंसर्गानुग्रहं निर्धारयति–

**यथा प्रयोक्तुः प्राग्बुद्धिः शब्देष्वेव प्रवर्तते।**
**व्यवसायो गृहीत्णामेवं तेष्वेव जायते।।**

अर्थात् वक्तुः बुद्धिः यथा अर्थावबोधनाय प्राक् उचितशब्दान्वेषयति तथैव श्रोतुः बुद्धिरपि अर्थावबोधनात् प्राक् श्रुतशब्दान् निरीक्षयति। तथा खलु शब्द एव प्रयोक्तुः श्रोतुश्च मध्ये अर्थप्रतिपत्तिसूत्रमनुबध्नाति। तत्र चेदं निश्चप्रचं ज्ञेयं यत् ग्राह्यविषयत्वमनापन्ने शब्दे सति शब्दद्वारा अर्थबोधो नैव जायते इत्यत्र वाक्यपदीयकारोक्तिर्ध्यातव्या–

**विषयत्वमनापन्नैः शब्दैर्नार्थः प्रकाश्यते।**
**न सत्तयैव तेऽर्थानामगृहीताः प्रकाशकाः।।**

अर्थात् ते श्रवणेन्द्रियद्वारा अगृहीताः शब्दाः सत्तामात्रेणैवार्थानां प्रकाशकाः नैव भवन्ति। अतः शब्दोच्चारणात् पूर्वं वक्ता शब्देन सह इच्छितार्थसम्बन्धं विधाय तदुच्चारणप्रेरणां बुद्धिं प्रति करोति ततः श्रोतापि अर्थज्ञानात् पूर्वं शब्देन सह स्वबुद्धियोगं विधत्ते शब्दस्य यथावत् बुद्धिगम्यानन्तरं तदभीष्टार्थस्य बोधं करोति। परन्त्वेतन्निश्चितं यदर्थस्य विद्यमाने सत्येव शब्दः स्वलक्ष्यपूर्त्तौ समर्थो भवति। अर्थात् अर्थस्य बोधनायैव शब्दस्य व्यावहारिकोपयोगिता विद्यते, यथामहाभाष्यकारः ब्रवीति–**अर्थगत्यर्थः शब्दप्रयोगः, अर्थं संप्रत्ययिष्यतीति शब्दप्रयोगः**। किन्तु एतदपि सातत्येन सत्यं यत् सर्वैः शब्दैः सर्वेषामर्थानां बोधो नैव भवति अपितु केनचिन्निश्चितेन शब्देन कस्यचित् सुनिश्चितार्थस्य बोधो भवति नान्यासम्बद्धार्थस्य। तर्हीह शब्दार्थयोः मध्ये कश्चन तादृशः सम्बन्धः स्वीकार्यः यः नियतशब्देन नियतार्थबोधकस्य नियामकः स्यात्। अन्यथा केनापि शब्देन कस्यचिदप्यर्थस्य बोधसंभवत्वं स्वीकार्यं स्यात्।

शब्दार्थसम्बन्धः नित्योऽनित्यो वेति नेह विवादः वैयाकरणेषु, प्रायः सर्वैरेव शब्दस्य नित्यत्वमुररीकृतम्–

**नित्याः शब्दार्थसम्बन्धाः समाम्नाता महर्षिभिः।**
**सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभिः।।**

अर्थात् व्याकरणशास्त्रे सूत्राणां वार्तिकाणां भाष्याणां च रचयितारः पाणिनि –कात्यायन–पतंजलिवैयाकरणाः नित्यः शब्दो, नित्योऽर्थो, नित्यः सम्बन्धः इति समाम्नाताः। सिद्धे शब्दार्थसम्बन्धे इति व्याकरणमुनिकात्यायनेन प्रस्तुतं वार्तिकं व्याख्यन् महर्षिपतंजलिराह–शब्दोऽपि सिद्धः अर्थोऽपि सिद्धः तयोश्च पारस्परिकः सम्बन्धोऽपि सिद्ध इति शास्त्र व्यवस्था। सिद्धपदस्यार्थस्तत्र महाभाष्यकारेण 'नित्य' इति कृतः–नित्यपर्यायवाची सिद्धशब्दः। तत्र हि शब्द इत्यनेन शब्दाकृतिरभिधीयते–आकृतिनित्यत्वान्नित्यः शब्दः इति। आकृतिप्रयुक्तं चेदं शास्त्रम्। आकृत्युपदेशात् सिद्धमिति भाष्यवार्तिकम्। अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति। तथेवर्णाकृतिः। तथो वर्णा कृतिरित्या दिव्याख्यानेन शब्दस्य नित्यत्वन्तत्र प्रमाणी कृतम्। अपि च – **सम्बन्धस्यापि व्यवहार परम्परया ऽनादित्वान्नित्यता**' इति महाभाष्ये प्रदीपः। प्रतिशब्दे च अर्थावबोधनस्य योग्यता सन्निहिता भवति अतः शब्देन सह वाच्यार्थस्यापि नित्यत्वमस्त्येव। इमामेव नित्यतामुल्लिखन् भर्तृहरिः कथयति– **एकस्यैवात्मनो भेदो शब्दार्थावपृथक्स्थितौ** ' अर्थात् शब्दः अर्थश्च एकस्य एव आत्मनः द्विधा रूपम्, अपृथग्भावेन स्थितमभिन्नमेव। तथैव तौ शब्दार्थौ संश्लिष्टौ अभिन्नौ यथा पार्वतीपरमेश्वराविति महाकवि कालिदा सेन स्वीये रघुवंशमहाकाव्ये मंगलाचरणे प्रतिपादितौ–

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।

पद्येऽस्मिन् जगद्विख्यातः कविकुलशिरोमणिः कालिदासः वागर्थप्रतिपत्तये वागर्थौ इव सम्पृक्तौ पार्वतीपरमेश्वरौ वन्दते। इह कवेरयमेवाभिप्रायः यद्यथा शिवः पार्वती परस्परमभिन्नौ अन्योऽन्यपूरकौ अन्योऽन्याश्रयौ सदा भवतः तथैव वाग् (शब्दः) अर्थश्च स्तः, शब्दाभावे अर्थस्य परिज्ञानाभावः, अर्थाभावे च शब्दस्यास्तित्वाभावः। अत एव शब्दार्थस्यैनमविनाभावसम्बन्धं परिज्ञापयितुमेव साहित्यस्यापि रचना साहित्यकारैः विहितास्ति। यतोहि सहितशब्देन साहित्यशब्दस्य निर्मितिः। तत्र सहभाव एव सहितः। कस्य सहभाव इति प्रश्ने शब्दार्थयोरेव इति निश्चप्रचम्, तस्मादेव शब्दार्थयोः प्राधान्यं साहित्येष्वंगीकृतम् – शब्दार्थयोर्यथावत्सहभावेन विद्या साहित्यविद्येति राजशेखरेण काव्यमीमांसायां स्पष्टीकृतमेव। तददोषौ शब्दार्थौ काव्यम् (मम्मटः), शब्दार्थौ सहितौ काव्यम्(भामहः), ननु शब्दार्थौ काव्यम्(रुद्रटः),काव्यशब्दोऽगुणालंकारसंस्कृतयोः शब्दार्थयोः वर्तते (वामनः), शब्दार्थौ सहितौ वक्रकविव्यापारशालिनी–––(कुन्तकः), साधु शब्दार्थ सन्दर्भगुणालंकारभूषितम् (वाग्भट्टः), सहृदयहृदयाह्लादि शशब्दार्थमयत्वमेव काव्य लक्षणम् (आनन्दवर्धनः), काव्यं विशिष्टशब्दार्थम् (क्षेमेन्द्रः), अदोषौ सगुणौ सालंकारौ च शब्दार्थौ काव्यम् (हेमचन्द्रः), शब्दार्थौ वपुरस्य काव्यम् (विद्याधरः) इत्यादयः प्रायः सर्वे साहित्यकाराः काव्येषु शब्दार्थयोरेव मुख्यत्वमुररीकुर्वन्ति तेषमपि मते शब्दार्थयोर्प्राधान्यम्, शब्दार्थयोर्नित्यत्वम्, शब्दार्थयोर्ब्रह्मत्वं (शिवेतरक्षतये, सद्यःपरनिवृत्तये) अस्त्येव इति शास्त्रं समधिगमनेन ज्ञायते खलु। एवं शब्दार्थविषयकं विवेचनं सर्वेषु व्याकरणेषु साहित्येषु परिदृश्य स्पष्टं ज्ञायते यत् शब्दार्थनित्यत्वमस्वीकृत्य न कस्यचित् शास्त्रस्य गतिर्विद्यते। व्याकरणस्य प्रतिष्ठा विद्येत साहित्यस्य वा, तत्र शब्दार्थयोर्साहित्यम्, शब्दार्थ योर्नित्यत्वमेवाधारः। नैतावदेव लोकव्यवहारोऽपि शब्दार्थमेवाश्रयति। अत एव लोकः, लोकव्यवहारः उभावपि शब्दम्–शब्दब्रह्म एवाश्रयतीति सारः येन शब्दब्रह्मणा लोकस्य सर्वाः व्यवहाराः अर्थभावेन विवर्तन्ते।।

सन्दर्भ सूची :–


1. वाक्यपदीये 1/1
2. मैत्रायण्युपनिषद् 6/22
3. वाक्यपदीये 1/122
4. वाक्यपदीये 1/4
5. शतपथब्राह्मणे 2/1/1/10
6. ऐतरेयब्राह्मणे 2/3/7
7. पतंजलि–महाभाष्ये
8. वाक्यपदीये 1/13
9. वाक्यपदीये 1/114
10. पाणिनीयसूत्रं 1/2/45
11. वाक्यपदीये 2/328
12. निरुक्ते 2/1
13. निरुक्ते 1/6
14. निरुक्ते 1/6
15. महाभाष–पस्पशाह्निके
16. वाक्यपदीये 1/24.25
17. परमलघुमंजुषा पृ॰ 255
18. वाक्यपदीये 3/3/28
19. काव्यप्रकाशहिन्दीव्याख्योदृधृतः।
20. वाक्यपदीये 1/52
21. वाक्यपदीये 1/55
22. महाभाष्ये
23. वाक्यपदीये 1/23
24. महाभाष्ये 1/1/1
25. वाक्यपदीय 2/31
26. रघुवंशे 1/1